# shrInyAsadashakam

# શ્રીન્યાસદશકમ્

## Document Information

Text title : nyAsadashakam

File name : nyAsadashakam.itx

Category : dashaka, misc, vedAnta-deshika, dashaka

Location : doc_z_misc_general

Author : Vedanta Desika

Transliterated by : Vikram Iyer vikram85.iyer at gmail.com

Proofread by : Vikram Iyer vikram85.iyer at gmail.com

Latest update : November 5, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# શ્રીન્યાસદશકમ્

॥ શ્રીઃ ॥

શ્રીમતે નિગમાન્તમહાદેશિકાય નમઃ ।

શ્રીમાન્ વેઙ્કટનાથાર્યઃ કવિતાર્કિકકેસરી ।
વેદાન્તાચાર્યવર્યો મે સન્નિધત્તાં સદા હૃદિ ॥

અહં મદ્રક્ષણ ભરો મદ્રક્ષણ ફલં તથા ।
ન મમ શ્રીપતેરેવેત્યાત્માનં નિક્ષિપેત્બુધઃ ॥ ૧॥

ન્યસ્યામ્યકિઞ્ચનઃ શ્રીમનનુકૂલોઽન્યવર્જિતઃ ।
વિશ્વાસ પ્રાર્થના પૂર્વમાત્મરક્ષા ભરં ત્વયિ ॥ ૨॥

સ્વામી સ્વશેષં સ્વવશં સ્વભરત્વેન નિર્ભરમ્ ।
સ્વદત્ત સ્વધિયા સ્વાર્થં સ્વસ્મિન્ ન્યસ્યતિ માં સ્વયમ્ ॥ ૩॥

શ્રીમન્નભીષ્ટ વરદ ત્વામસ્મિ શરણં ગતઃ ।
એતદ્દેહાવસાને માં ત્વત્પાદં પ્રાપય સ્વયમ્ ॥ ૪॥

ત્વચ્છેષત્વે સ્થિરધિયં ત્વત્પ્રાપ્ત્યેક પ્રયોજનમ્ ।
નિષિદ્ધકામ્યરહિતં કુરુ માં નિત્ય કિઙ્કરમ્ ॥ ૫॥

દેવી ભૂષણ હેત્યાદિ જુષ્ટસ્ય ભગવંસ્તવ ।
નિત્યં નિરપરાધેષુ કૈઙ્કર્યેષુ નિયુઙ્ક્ષ્વ મામ્ ॥ ૬॥

માં મદીયં ચ નિખિલં ચેતનાચેતનાત્મકમ્ ।
સ્વકૈઙ્કર્યોપકરણં વરદ સ્વીકુરુ સ્વયમ્ ॥ ૭॥

ત્વદેક રક્ષ્યસ્ય મમ ત્વમેવ કરુણાકર ।
ન પ્રવર્તય પાપાનિ પ્રવૃત્તાનિ નિવર્તય ॥ ૮॥

અકૃત્યાનાં ચ કરણં કૃત્યાનાં વર્જનં ચ મે ।
ક્ષમસ્વ નિખિલં દેવ પ્રણતાર્તિહર પ્રભો ॥ ૯॥

શ્રીમાન્નિયત પઞ્ચાઙ્ગં મદ્રક્ષણ ભરાર્પણમ્ ।
અચીકરત્સ્વયં સ્વસ્મિનતોઽહમિહ નિર્ભરઃ ॥ ૧૦॥

॥ ઇતિ શ્રીન્યાસદશકં સમાપ્તમ્ ॥

કવિતાર્કિકસિંહાય કલ્યાણગુણશાલિને ।
શ્રીમતે વેઙ્કટેશાય વેદાન્તગુરવે નમઃ ॥

Encoded and proofread by Vikram Iyer vikram85.iyer at gmail.com

*shrInyAsadashakam*
pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*